# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – फलितज्योतिषम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – बृहत्संहिता** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ यदा रेणूत्पातैर्प्रविचलसटाटोपचपलः
प्रवातः पश्चाच्चेद्दिनकरकसम्पातसमये।
तदा सस्योपेता प्रवरनिकराबद्धसमरा
क्षितिः स्थानस्थानेष्वविरतवसामांसरुधिरा॥

२ मयूरशुकचापचातकसमानवर्णा यदा
जपाकुसुमपङ्कजद्युतिमुपश्च सन्ध्याघनाः।
जलौ निमग्नक्रकच्छपवराहमीनोपमाः
प्रभूत पुटसञ्चया न तु चिरेणयच्छन्त्यपः॥

३ दिवसकृतः प्रति सूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत्।
उभयस्थसलिलभयं नृपमुररि निहन्त्यधो जनहा॥

४

**प्रश्नः २** कुसुमलताध्यायोऽपरि निबन्धं निबन्धयत।

**प्रश्नः ३** भूकम्पलक्षणं सङ्क्षेपेण लिखत।

**प्रश्नः ४** इन्द्रायुधलक्षणं लिखत।

**प्रश्नः ५** रजलक्षणं लिखत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ जामित्रकेन्द्रसंस्थौ क्रूरौ सूर्यस्थ वृश्चिकस्थस्य।
सस्य विपत्तिं कुरतः सौम्यैर्दृष्टो न सर्वत्र॥

२ नीराजने निवृत्ते यथा दिशाखञ्जनं नृणे यान्तम् ।
पश्येन्तया गतस्य क्षिप्रमरातिर्वशमुपैति ॥

३ शस्ताशान्तद्विजमृगाघुण्टा स्निग्धाः मृदुषपवना च ।
पांशुध्वस्ता जनपदनाशं धत्ते रुक्षारुधिरनिभा वा ॥

४ नपुंसकाख्यं च शिरोललाटमाश्वाद्य सञ्ज्ञैरपरैश्चिरेण ।
सिद्धिर्भवेज्जातु नपुंसकैर्नो रुक्षक्षतैर्भग्नकृशैश्च पूर्वैः ॥

**प्रश्नः ७** द्रव्यनिश्चयविचारं लिखत ।

**प्रश्नः ८** खञ्जनफलं लक्षणञ्च लिखत ।

**प्रश्नः ९** पुष्यस्नानविचारः क्रियताम् ।

**प्रश्नः १०** पिटकलक्षणं फलञ्च लिखत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ वातचक्रविचारः कस्य मासस्य पूर्णिमायां विचारणीयः समयः योग्यः ?
२ ईशानकोणस्य वातफलं किम् ?
३ कृत्तिकानक्षत्रे कति द्रोणवृष्टिं प्रमाणम् ?
४ प्रवर्षणकालः कदा भवति ?
५ प्रतिसूर्यमालादस्यु तत् किं फलम् ?
६ रजनीद्वयं विसर्पति यस्मिन् राष्ट्रे रजोघनबहुलं तत् किं फलम् ?
७ त्रिषु मेषादिषु सूर्यः सौम्ययुतेऽपि वा विचरन् ग्रैष्मिकधान्ये किं फलम् ?
८ मयूरचित्रकाध्याये हानिसञ्चारवशः किं फलम् ?
९ किं स्नानं नृपतेः कर्तव्यं दैववित्पुरोधाभ्याम् ?
१० पुण्यस्नाने 'काञ्चनीम' कोऽर्थः ?
११ आचार्यैः पट्टानां कति भेदाः प्रकीर्तिताः ?
१२ उत्तमखड्गलम्बप्रमाणं किम् ?
१३ पादाङ्गुलेन विलिखेद्यदा भूमौ प्रश्नकर्ता तदा कस्य चिन्ता विचारणीया ?
१४ यदा प्रश्नकर्ता जठरं स्पर्शयेत तदा कः चौरः अदिशेत ?
१५ सुस्निग्धं व्यक्तशोभाः शिरसि पिटिकस्तद् किं फलम् ?

****